श्रीलोकनाथभट्टप्रणीतं

*

कृष्णाभ्युदयम्

रेन्द्रनाथ शर्मा

एम.ए.

कविशेखर इति प्रथितपट्टाभिधानस्य
श्रीवरदार्यस्य तनूद्भवेन

श्रीलोकनाथभट्टेन प्रणीतं

कृष्णाभ्युदयं

प्रेक्षणकम् ।

तच्च

मध्यप्रदेशान्तर्गतमहाकोशलविषयान्तःपाति-
जावालिपुरवासिना एम. ए. इति विरुदभाजा

श्रीनरेन्द्रनाथशर्मणा

एकमात्राधिगतं तालपत्रलिखितमादर्श-
पुस्तकं पर्यालोच्य हिन्दीभाषयाऽनूद्य
भूमिकया परिशिष्टैश्चालङ्कृत्य

सम्पादितम्

प्रथमं संस्करणम्]   १९६४   [मूल्यं त्रीणि रूप्यकाणि

मुद्रक :—
शुभचिन्तक प्रेस
दीक्षितपुरा, जबलपुर (म. प्र.)
टेलीफोन—२५५१

★

प्रकाशक :—
प्रो. जगदीशलाल शास्त्री
प्रेमनगर
जबलपुर (म. प्र.)

:: भूमिका ::

प्रस्तुत प्रेक्षणक 'कृष्णाभ्युदय' तालपत्र पर ग्रन्थलिपि में लिखित एवं एकमात्र उपलब्ध हस्तलिखित पुस्तक पर आधारित है। यह आदर्शपुस्तक तंजोर के सरस्वती महल पुस्तकालय में सुरक्षित है। इसका विवरण बर्नेल महोदय कृत हस्तलिखित पुस्तकों की सूची के १६८ वें पृष्ठ पर संख्याक्रमांक १०७०१ के अन्तर्गत मिलता है।

इस हस्तलिखित पुस्तक का आकार १५½ × १½ है। इसके नौ पन्ने : अठारह पृष्ठ हैं। प्रत्येक पृष्ठ पर छः पंक्तियाँ हैं। ग्रन्थ संख्या १५० है। इसके रचयिता लोकनाथभट्ट हैं। पंक्तियों में कई वर्ण नष्ट हो गए हैं, किन्तु पुस्तक पूर्ण है।

इसकी प्रस्तावना से मालुम होता है कि इसकी रचना श्री वरदार्य के पुत्र श्रीलोकनाथ भट्ट ने की। श्री वरदार्य का प्रसिद्ध नाम कविशेखर था। जनश्रुति के अनुसार लोकनाथभट्ट विश्व-गुणादर्शचम्पू के निर्माता वेङ्कटाध्वरी के मामा थे। (१) वेङ्कटाध्वरी का काल ईसा की सत्रहवीं शती का मध्यभाग है। लोकनाथ भट्ट का समय भी सत्रहवीं शती का मध्यभाग ही होगा।

इनका आवास दक्षिण भारत में था। प्रस्तुत प्रेक्षणक कांजीवरं के अधिपति श्रीहस्तिगिरिनाथ के वार्षिक ब्रह्मोत्सव पर खेला गया था। इसका संकेत हमें इस प्रेक्षणक की प्रस्तावना से मिलता है। भरतवाक्य में तत्कालीन राजा के नाम का उल्लेख नहीं है।

---

(१) द्रष्टव्य—आदर्शपुस्तकों का विवरणात्मक सूचीपत्र, मद्रास।

यद्यपि प्रेक्षणक का दृश्यस्थल उत्तरभारत की मधुरापुरी है तो भी इसमें दक्षिण भारत के स्मारक कुछ संकेत अवश्य मिलते हैं, जैसे मथुरा में घूमती हुई दिव्यादेशिनी विश्ववेदिनी महिषपुर (मैसूर) के बने कर्णभूषण पहने हुए हैं। (१)

कृष्णाभ्युदय उपरूपक है। भारतीय जनता के आराध्य देवता देवकी-पुत्र श्रीकृष्ण का जन्म इस उपरूपक की आधिकारिक वस्तु है। दैवज्ञों ने कहा था कि मथुरा के नरेश कंस की मृत्यु देवकी की आठवीं सन्तति के द्वारा होगी। कंस ने भयभीत होकर देवकी के सात अपत्यों का वध करवा डाला। देवकी की आठवीं सन्तान श्रीकृष्ण थे जिन्हें वह न पा सका। क्योंकि देवकी के पति वसुदेव छल से नन्दगोप की शिशु कन्या को उठा लाए थे और कन्या के स्थान पर श्रीकृष्ण को रख आए थे। अज्ञानवश कंस ने उस कन्या को देवकी की आठवीं सन्तति समझा और मार डाला। इस प्रकार उसके भावी घातक शिशु श्रीकृष्ण बच गए।

प्रस्तुत कृति में देवकी को अपनी सात कन्याओं के वध का शोक और भावी पुत्रजन्म की चिन्ता निरूपित है। विश्ववेदिनी नाम की दिव्यादेशिनी उसे धैर्य बंधाती है। अन्त में पुत्रजन्म से उसे आनन्द होता है।

उपरूपक में रूपक के सदृश चिन्ह होते हैं। (२) रूपक में नट में अनुकार्य के रूप का आरोप होता है। (३) उपरूपक में भी नट अनुकार्य पात्रों का रूप धारण कर लेते हैं। कृष्णाभ्युदय की प्रस्तावना में नट-सूत्रधार संवाद उक्त कथन का परिचायक है। नृत्तदीपिका विश्ववेदिनी की भूमिका में अभिनय करती है। (४)

---

(१) माहिषदन्तपत्ररुचिरा—५, (२) उपगतं सादृश्येन रूपकमिति।
(३) रूपारोपात्तु रूपकम् (४) सूत्रधार :— इयमस्मत्सखी नृत्त-दीपिका दिव्यदैवज्ञाया विश्ववेदिन्या भूमिकामादाय......

अन्य नेता भी अपने अपने अनुकार्य चरित्रों का अभिनय करते हैं।

उपरूपक के कई प्रकार हैं। अग्निपुराण में उपरूपक के सत्ताईस प्रकारों का निर्देश है। विश्वनाथ कविराज के समय तक उपरूपक के अट्ठारह प्रकार ही रह गए। उपरूपक का एक प्रकार प्रेक्षणक है जिसे अग्निपुराण में प्रेङ्खण कहा गया है। अग्निपुराण में प्रेङ्खण का उदाहरण त्रिपुरमर्दन है। प्रस्तुत उपरूपक भी प्रेक्षणक व प्रेङ्खण है। इसकी प्रस्तावना में नटी सूत्रधार से पूछती है कि हम किस मनोहर उपरूपक से शिक्षित समाज को प्रसन्न करें। सूत्रधार कहता है— 'कृष्णाभ्युदय नामक प्रेक्षणक से।' इस साक्ष्य से सिद्ध हो जाता है कि कृष्णाभ्युदय प्रेक्षणक नाम का उपरूपक है।

साहित्य-शास्त्र में प्रेक्षणक को प्रेङ्खण, प्रेङ्खणक, और प्रेक्षणीयक भी कहा है। किन्तु अभिनवगुप्त का 'प्रेरण' इससे सर्वथा भिन्न है, क्योंकि प्रेरण के लक्षण में अभिनवगुप्त ने हास्य और प्रहेलिका होने का निर्देश किया है (१) जबकि साहित्य शास्त्र में निरूपित प्रेङ्खण या प्रेक्षणक के लक्षण में हास्य और प्रहेलिका दोनों का निर्देश नहीं है।

प्रेक्षणक एकांकी रूपक होते हैं। नृत्त प्रधान होने से इन्हें उपरूपक कहने लगे। नाटकलक्षणरत्नकोश में सागरनन्दी ने नृत्त रूपक की जो विशेषताएँ कहीं हैं वे प्रायः प्रेक्षणक में मिलती हैं। नृत्त-रूपक का अभिनय ताल और लय पर आश्रित रहता है। (२)ताललयाश्रित नृत्त प्रधान रचना को नर्तनक भी कहा है। नृत्त-रूपक की प्रायः सभी विशेषताएँ कृष्णाभ्युदय में मिलती हैं।

---

(१) अभिनवभारती भाग १ पृ० १८०–८१ "हास्यप्रायं प्रेरणन्तु स्यात्प्रहेलिकयान्वितम्।"

(२) "नृत्तं ताललयाश्रितम्" द० रू०

साहित्यशास्त्र में प्रेक्षणक की विशेषताओं का पर्याप्त वर्णन किया गया है। शृङ्गारप्रकाश में भोजराज (११०० ई०) ने प्रेक्षणक के विषय में इस प्रकार लिखा है—

रथ्यासमाजचत्वरसुरालयादौ प्रवर्त्यते बहुभिः।
पात्रविशेषैर्यत्तत्प्रेक्षणकं कामदहनादि ॥

गली में, समाज में, चौराहा पर, मद्यशाला व देवमन्दिर में बहुत से विशेष प्रकार के पात्रों द्वारा जिसका प्रदर्शन किया जाय उसे प्रेक्षणक कहते हैं, जैसे कामदहन।

रामचन्द्र गुणचन्द्र (१२०० ई०) ने नाट्यदर्पण में भोज के शृङ्गारप्रकाश से ही प्रेक्षणक का लक्षण उतारा है।

सागरनन्दी (१२०० ई०) प्रेक्षणक को नृत्तरूपक मानते हैं। उनके अनुसार नृत्तरूपक का लक्षण इस प्रकार है।

"अशेषभाषोपशोभितं शौरसेनीप्रधानं गर्भविमर्शशून्यं तल्लक्षणयुक्तञ्च । सर्ववृत्तिसम्पन्नम् । प्रतिमुखसन्धिप्रवेशक-विष्कम्भका अत्र न कर्तव्याः। परिवर्तकयुक्तं प्रयत्नतः कार्यम्। नियुद्धसम्फेटयुतं विपदनुचिन्ताबहुलञ्च । अतः सूत्रधारो न विधेयः। नान्दी उपक्षेपश्च विधेयः। यथा बालिवधः।"

इस लक्षण के अनुसार नृत्तरूपक में केवल प्रतिमुखसन्धि का बहिष्कार किया गया है जबकि प्रेक्षणक में गर्भ और अवमर्श को त्याज्य कहा गया है। नृत्तरूपक और प्रेक्षणक में यही अन्तर है।

भावप्रकाशन के निर्माता शारदातनय (१३०० ई०) के अनुसार (१) प्रेक्षणक में गर्भ और अवमर्श का होना प्रायिक है। नान्दी का पठन नेपथ्य में ही होना चाहिए। कैशिकी, भारती, सात्त्वती और आरभटी इन वृत्तियों में से किसी वृत्ति का भी प्रयोग हो सकता है।

किन्तु सूत्रधार का होना इन्हें सर्वथा अभीष्ट नहीं है।

कविराज विश्वनाथ (१४०० ई०) ने साहित्यदर्पण में प्रेक्षणक के विषय में लिखा है कि उसमें गर्भ और अवमर्श सन्धियाँ नहीं होतीं; विष्कम्भक और प्रवेशक नहीं होते। सूत्रधार भी नहीं होता। उसमें रोप-भाषण, बाहु-युद्ध तथा सभी वृत्तियाँ होती हैं। प्ररोचना और नान्दी नेपथ्य में पढ़ी जाती है। विश्वनाथ के मत में बालिवध सर्वोत्कृष्ट प्रेक्षणक है। (२)

---

(१) पूर्वं नेपथ्यपाठेन नान्दी तस्य विधीयते।
क्वचिद्गर्भावमर्शौ स्तः क्वचिद्वृत्तिचतुष्टयम् ॥
क्वचिन्नेपथ्यवाक्याढ्यं न कदाचन सूत्रधृक्
एवं प्रेक्षणकं विद्याद् यथा त्रिपुरमर्दनम् ॥

(२) साहित्यदर्पण ६

गर्भविमर्शरहितं प्रेङ्खणं हीननायकम्।
असूत्रधारमेकाङ्कमविष्कम्भप्रवेशकम्।
नियुद्धसम्फेटयुतं सर्ववृत्तिसमाश्रितम्।
नेपथ्ये गीयते नान्दी तथा तत्र प्ररोचना ॥

विश्वनाथ से कुछ समय पूर्व (१३५० ई०) अमृतानन्द योगी हुए हैं जिन्होंने अलङ्कारसंग्रह की रचना की। इन्होंने प्रेक्षणक की कुछ अन्य विशेषताओं पर प्रकाश डाला है। इनके अनुसार प्रेक्षणक में मागधी और शौरसेनी प्राकृत हीननायक की चेष्टाओं का वर्णन, नेपथ्य में गीत नाट्य का प्रयोग और प्रेक्षणक का प्रयोजन कोई देवकार्य होना चाहिए। (१)

ईसा की सत्रहवीं शती के अन्तिम भाग में कामराज दीक्षित ने काव्येन्दुप्रकाश की रचना की। काव्येन्दुप्रकाश का प्रेक्षणक लक्षण साहित्यदर्पण के प्रेक्षणक लक्षण से समता रखता है। (२)

---

(१) गर्भावमर्शहीनं वा मुखनिर्वहणान्वितम्।
सूत्रधारविहीनं च सर्ववृत्तिसमाश्रितम्॥
नियुद्धसम्फेटयुतं परिवर्तकभूषितम्।
मागधी शौरसेनी च हीननायकचेष्टितम्॥
नेपथ्ये गीतनाट्यं च परत्रैव प्रयोजनम्।
अप्रवेशकविष्कम्भमेकाङ्कं प्रेक्षणं विदुः॥
निदर्शनमिह ज्ञेयं वस्तु वालिवधादिकम्।

(२) प्रेङ्खणं सूत्रधारेण सहितं हीननायकम्।
हीनं गर्भविमर्शाभ्यामेकाङ्कं ख्यातनायकम्।
वीथ्यङ्गश्लिष्टनान्दीकं निर्विष्कम्भप्रवेशकम्
नियुद्धसम्फेटयुतं सर्ववृत्त्याश्रयं विदुः
नेपथ्ये गीयते नान्दी स्यात्तथात्र प्ररोचना॥

ईसा की ग्यारहवीं शती से लेकर ईसा की सत्रहवीं शती तक की अवधि में साहित्य-शास्त्रियों द्वारा किए गए प्रेक्षणक के लक्षणों से ज्ञात होता है कि इसमें प्रायः गर्भ और अवमर्श सन्धियाँ नहीं होतीं। विष्कम्भक और प्रवेशक भी नहीं होते। प्रधाननायक प्रख्यात वंश का होता है। नान्दी और प्ररोचना नेपथ्य में पढ़ी जाती हैं।

विश्वनाथ, अमृतानन्द और कामराज प्रेक्षणक में हीन-नायक का होना चाहते हैं। किन्तु कृष्णाभ्युदय में श्रीकृष्ण उत्कृष्ट नायक हैं। प्रतिनायक कंस ही हीननायक है जिसके दुश्चरितों का निर्देशमात्र इस प्रेक्षणक में मिलता है।

प्रेक्षणक की सभी विशेषताओं में से एक विशेषता पर विशेष बल दिया गया है कि उसमें सूत्रधार नहीं होना चाहिए। कृष्णाभ्युदय में नटी और सूत्रधार दोनों मञ्च पर आते हैं। इससे स्पष्ट है कि प्रेक्षणक का लक्षण करते समय परवर्ती साहित्य-शास्त्रियों के ध्यान में प्रस्तुत प्रेक्षणक नहीं था और लोकनाथभट्ट ने प्रस्तुत प्रेक्षणक में साहित्यिक परम्परा की अवहेलना की है।

भावप्रकाशन के रचयिता शारदातनय का कथन है कि नान्दी और प्ररोचना का गान नेपथ्य में होना चाहिए, रङ्गमञ्च पर नहीं। किन्तु प्रस्तुत प्रेक्षणक में नान्दी-प्ररोचना का प्रदर्शन रङ्गमञ्च पर होता है जो कि नियम के प्रतिकूल है। सम्भव है कि या तो लोकनाथभट्ट ने प्रेक्षणक की इस विशेषता की ओर ध्यान नहीं दिया अथवा आदर्शप्रतियों के लेखक नान्दी के आरम्भ में 'नेपथ्ये' लिखना भूल गए।

साहित्यशास्त्र के अनुसार मुख और निर्वहण सन्धियों से ही प्रेक्षणक की कथावस्तु का विन्यास होता है। प्रतिमुख सन्धि का होना वर्जित है। गर्भ और अवमर्श सन्धियों का होना प्रायिक है। अतः प्रस्तुत प्रेक्षणक में हम मुख और निर्वहण सन्धियाँ ही पाते हैं।

इस प्रेक्षणक की केन्द्र बिन्दु दैवज्ञा विश्ववेदिनी है। वह मथुरा की स्त्रियों को सौभाग्य बतलाती है। वह दक्षिणापथ से आई है। आज उसकी बाईं आँख फड़क रही है। आज उसे अवश्य लाभ होगा। वह वसुदेव की पत्नी देवकी के घर आती है। देवकी गर्भिणी है। वह अपने जीवन की अतीत घटनाओं से अतिव्याकुल है। उसकी सात नन्हीं नन्हीं बच्चियों को दुष्ट कंस ने मार डाला है। अब आठवीं सन्तति की भी वही दशा होगी।

विश्ववेदिनी उसे धैर्य बंधाती है। भगवती काली की कृपा से उसके वाक्य कभी मिथ्या नहीं उतरते। वह देवकी के हाथ-पाँव की रेखाओं को देखती है। रेखाओं से पता चलता है कि देवकी को पुत्रलाभ होगा। वह देवकी के गर्भमनोरथ को भी प्रकट करती है जिससे देवकी को उस पर पूर्ण विश्वास हो जाता है।

इस प्रकार इस प्रेक्षणक में मुख सन्धि का निर्वाह उत्तम ढंग से किया गया है।

श्रीकृष्ण के जन्म से निर्वहण सन्धि का प्रारम्भ होता है। दिव्य मंगलमय वाद्यों का घोष, पुष्पों की वर्षा, मधुर गीत और नृत्य श्रीकृष्णजन्म का अभिनन्दन करते हैं। देवताओं के साथ

पितामह का प्रवेश होता है। वे शिशु का नामकरण करते हैं और उसे आशिष देते हैं। भरतवाक्य में शुभ आशंसाओं के साथ प्रेक्षणक का अन्त होता है।

प्रेक्षणकों की कथावस्तु प्रायः रामायण, महाभारत, पुराण और साम्प्रदायिक कथानकों से सम्बद्ध होती है। सम्भव है कि वह धर्मनिरपेक्ष कथानकों पर भी आधारित रही हो। किन्तु आजकल के उपलब्ध प्रक्षणकों से पता चलता है कि प्रेक्षणकों जैसा रोचक साहित्य भी धार्मिक परम्पराओं से मुक्त नहीं था। भास्कर और विरूपाक्षदेव के उन्मत्तराघव नामक प्रेक्षणकों का आधार जगद्वन्द्या सीता और भगवान राम हैं, यद्यपि इन दोनों प्रेक्षणकों की कथा रामायण की कथा से भिन्न है।

विश्वनाथकृत सौगन्धिकाहरण के कथानक का महाभारत के वनपर्व से सम्बन्ध है। प्रस्तावना में इसे प्रेक्षणक माना गया है। साहित्यदर्पणकार विश्वनाथ इसे व्यायोग मानते हैं। किन्तु साहित्यदर्पणकार ने इसी कृतो को व्यायोग माना होगा इसमें संदेह है। इससे भिन्न इस नाम का व्यायोग भी हो सकता है जो आज उपलब्ध नहीं है। डाक्टर कीथ और आचार्य कपिलदेव इसी उपलब्ध कृती को व्यायोग मानते हैं।

नृसिंहविजय, वालिवध, त्रिपुरमर्दन और कामदहन प्रेक्षणक हैं। इनके शीर्षकों से ही मालूम हो जाता है कि इनके कथानकों का आधार पौराणिक है। मूल कथानक में परिवर्तन कर देना प्रेक्षणक साहित्य की स्वाभाविक विशेषता है।

प्रस्तुत प्रेक्षणक का सम्बन्ध महाभारत एवं पुराणों में वर्णित कृष्णजन्म के कथानक से है। ब्रह्मत्र वैद्यनाथ का भैरव-विलास

साम्प्रदायिक रचना है। इसकी प्रस्तावना से पता चलता है कि वैद्यनाथ के समय तक कई साम्प्रदायिक प्रेक्षणकों की रचना हो चुकी थी।

गलियों में, समाज में, चौराहा में तथा मन्दिरों में खेले जाने से प्रेक्षणक साहित्य की लोकप्रियता का पता चलता है। मूल कथानक के किसी एक अंश पर आधारित होने एवं रूपकों के स्थायी तत्त्वों से शून्य होने के कारण प्रेक्षणक साहित्य चिरकाल तक जीवित न रह सका। यह साहित्य अब लुप्तप्राय हो गया है। इसकी आदर्श पांडुलिपियाँ भी बहुत कम मिलती हैं। प्राप्य पांडुलिपियाँ भी जीर्ण-शीर्ण हैं। इनका संशोधन कार्य सरल नहीं है॥

आभार प्रदर्शन :—

संस्कृत, पाली और प्राकृत भाषाओं एवं साहित्य के विश्वविख्यात विद्वान्, एम. ए. एल. एल. बी., डी. लिट्. आदि अनेक पद विभूषित तथा मध्यप्रदेशीय जबलपुर विश्वविद्यालय में संस्कृत-विभाग के प्रमुख आचार्य डाक्टर हीरालाल जी जैन का मैं बहुत आभारी हूँ जिनके अनुपम साहित्यिक जीवन से प्रेरित एवं उत्साहित होकर मै इस प्रेक्षणक के सम्पादन में अग्रसर हुआ। इस ग्रन्थ के सम्पादन में जबलपुर विश्वविद्यालय के अनुसन्धान विभाग में सहायक आचार्य श्री बाबूलाल जी शुक्ल एम. ए. साहित्याचार्य से प्राप्त सहायता से मैं उऋण नहीं हो सकता।

श्री लोकनाथभट्टकृतं

कृष्णाभ्युदयं

प्रेक्षणकम्

(नान्दी)

क्वापि स्तन्यरसं प्रदातुमुचितां गोपाङ्गनाभूमिकां
या प्राप्ता तदसून्सह स्तनरसैः कृष्ण त्वमापीतवान् ।
अन्या त्वामिह विश्वसेत्कथमिति व्याहारिणीं मातरं
वीक्षन्स्मेरमुखेन्दुरङ्कशयितो मायाशिशुःपातु नः ॥१॥

अपि च

ब्रह्मस्तम्बं निजात्मन्यवधिविरहितं बिभ्रदानन्दसान्द्रं
तेजो यत्तच्छ्रुतीनामपि गतिविषयं नैति विश्वातिलङ्घि ।
मानुष्यं मायया तन्महितजनपरित्राणहेतोरवाप्तं
देवक्या भागधेयं दिशतु धृतदयं शाश्वतीं सम्पदं नः॥२॥

(नान्द्यन्ते सूत्रधारः)

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य) आर्ये, इतस्तावत् ।

नटी—(प्रविश्य) अय्य, आणवेदु भवं । (आर्य, आज्ञापयतु भवान् ।)

सूत्रधारः—अद्य नस्सुप्रभातः यत्काञ्चीपुरपतेः श्रीहस्तिगिरिनाथस्य वार्षिकब्रह्मोत्सवे समवेताः सामाजिकाः समादिशन्ति— "अद्य विज्ञनटचूडामणे रसिकहृदयाह्लादकेन केनाप्यपूर्ववस्तुरूपेणोपरूपकेणास्मत्सभा सभाजनीया" इति

नटी—किं तं उवरूअअं जेण चमक्कारकारएण विअड्ढपरिसदं आराहइमो ? (किं तदुपरूपकं येन चमत्कारकारकेण विदग्धपरिषदमाराधयामः ?)

सूत्रधारः—(स्मरणमभिनीय) आर्ये, किं न जानासि ? अस्ति खलु कविशेखर इति प्रथितपट्टाभिधानस्य वरदार्यस्य पुत्रेण लोकनाथभट्टेन विरचितं कृष्णाभ्युदयं नाम प्रेक्षणकम् ।

तेनैव सुशिक्षिततद्रूपकप्रयोगैरस्माभिः परिषदियं तोषणीया । तद्वर्षासमयमधिकृत्य गीयताम् । तथा हि—

धारालैर्धृतशक्रचापरुचिरैः कूलङ्कषा ह्यापगाः
कुर्वद्भिस्सलिलात्मिकामिव महीमुन्नादिभिर्वारिदैः ।
फुल्लन्नीपशिलीन्ध्रकेतकरजो नूनं जिगीषोर्जग-
त्सेनाधूलिरिव प्रसूनधनुषो दिग्व्यापकं जृम्भते ॥३॥

नटी—(गायति)

गरुगब्भभारखिवण्णं
समहिअणीसत्तसंथरं चोलिं ।
घणरअप्पमुदिआ सिहिणी
दठ्ठूण धुणइ केअहिं ॥४॥
[गुरुगर्भभारखिन्नां
समधिकनिस्सत्त्वमन्थरां चोलिम् ।
घनरवप्रमुदिता शिखिनी
दृष्ट्वा धुनोति केशान् ॥४॥]

सूत्रधारः—अहो रागसौभाग्यम् । (निरूप्य) व्यञ्जयति च काव्यवस्तु गाथेयम । तथा हि—इयमस्मत्सखी नृत्तदीपिका दिव्यदैवज्ञाया विश्ववेदिन्यां भूमिकामादाय देवकीदेवीं लक्षणप्रमाणकथनेनाश्वासयितुं मधुरापुरराजमार्गमवतीर्णा प्रतिगृहं पर्यटन्ती वसुदेवगृहाभिमुखीव एवाभिवर्तते ।

यैषा—

धम्मिल्लाहितमल्लिका व्यतिकृतं गुञ्जाफलैर्मौक्तिकै—
र्हारं माहिषदन्तपत्ररुचिरा ताम्बूलगर्भानना
बिभ्राणा मदरज्यमाननयना संव्यानरुद्धस्तनी
लीलाकुञ्चितवामकूर्परधृतां पेटीं वहन्ती मुदा ॥५॥

तदावामप्यनन्तरकरणीयाय सज्जीभवावः ।

[इति निष्क्रान्तौ]

॥ प्रस्तावना ॥

(ततः प्रविशति यथोद्दिष्टा विश्ववेदिनी)

विश्ववेदिनी —(सहर्षं, परितो विलोक्य) अम्मो संपण्णसमिद्धसव्वत्थपरिपुण्णा संमोदमाणपोरजणमहुरा महुरा । (पेटिकां विलोक्य) एत्थ पडिघरं इत्थिआणं सोभग्गमंगललक्खणं दस्सअंतीए मह पेडिआ तण्डुलदिण्णारमुत्ताफलपडिपूरिआ । (विलोक्य) एतं क्खु महप्पणो वसुदेव्वस्स घरं । इदं खु तं । जाव प्पविसामि । (प्रविश्य) (वामाक्षिस्पन्दनं सूचयित्वा) ।

वामविलोअणपिसुणफ्फुरन्तं अज्ज मे कुसलं ।
(विमृश्य) एत्थ महदा फलेण होदव्वं ।
अवरं क्खु देवईए फल अहिअं किं णु तणअ—
दंसणादो ॥६॥

(विचिन्त्य) उइदावसरप्पवेसणाई राअउलाइ णाम । ता एत्थ बहिअतोरणत्थंवे अत्तलिहिदं राअउलावुत्तं जाणिअ पविसामि । (तथा करोति) ।

(अहो ! सम्पन्नसमृद्धसर्वार्थपरिपूर्णा सम्मोदमानपौरजनमधुरा मथुरा । अत्र प्रतिगृहं स्त्रीणां सौभाग्यमङ्गललक्षणं दर्शयन्त्या मम पेटिका तण्डुलदीनारमुक्ताफलपरिपूरिता । इदं खलु महात्मनो वसुदेवस्य गृहम् । इदं खलु तत् । यावत्प्रविशामि ।

वामलोचनपिशुनस्फुरद्भुज अद्य मे कुशलम् ।
अत्र महता फलेन भवितव्यम् ।

अपरं खलु देवक्याः फलमधिकं किं नु तनयदर्शनतः ॥६॥

उचितावसरप्रवेशनानि राजकुलानि नाम । तदत्र बाह्य-तोरणस्तम्भ आप्तलिखितं राजकुलवृत्तं ज्ञात्वा प्रविशामि ।)

(नेपथ्ये)

इदो इदो भट्टिणी । (इतो इतो भट्टिनी ।)

विश्ववेदिनी—(कर्णं दत्त्वा) (विलोक्य) एसा परिआरिआए अवलम्बिअआणा गब्भभरालसा देइ देवई इदो एव्व आअच्छइ । जा एसा (एषा परिचारिकयाऽवलम्ब्यमाना गर्भभरालसा देवी देवकीत एव आगच्छति । यैषा)

अज्ज अउरसोहग्गं अंगेहिं निअमच्छीणछीणेहिं ।
धारेंती अमिअरसं तिहुवणजीवादु इंदुलेहेव ॥७॥
[अद्यातुलसौभाग्यमङ्गैर्नियमक्षीणक्षीणैः ।
धारयन्त्यमृतरसं त्रिभुवनजीवातु इन्दुलेखेव ॥७॥]

(ततः प्रविशति यथोद्दिष्टा देवकी)

देवकी—हंजे, णिउणिए, अवि णाम तस्स जोईसरस्स वअणं सच्चं भवे । (हञ्जे, निपुणिके, अपि नाम तस्य योगीश्वरस्य वचनं सत्यं भवेत् ?)

निपुणिका—भट्टिणी, जोईसरस्स वअणं असच्चं ण होई।
(भट्टिनि, योगीश्वरस्य वचनमसत्यं न भवति।)

देवकी—अवि णाम अय्यउत्तस्स भाअहेआइ फलमुहाइ होंति ? अवि णाम महत्ताणं बम्हणाणं आसंसाओ सच्चा वा होंति ? अहवा किं एदिणा महोरहविजंभिदेण। अहं क्खु सा दुहभाइणी देवइ। (अपि नामार्यपुत्रस्य भागधेयानि फलमुखानि भविष्यन्ति ? अपि नाम महतां ब्राह्मणानामाशंसाः सत्या वा भविष्यन्ति ? अथवा किमेतेन मनोरथविजृम्भितेन। अहं खलु सा दुःखभागिनी देवकी।)

निपुणिका—भट्टिणी, अलं विसादेण। तादिसाणं महंत्ताणं भासिदं जं दंसिदसअललोअदिसाइमाहप्पं पुत्तं देवई जणइस्सदित्ति। अहवा कि इमाइ तुह सोहणलक्खणाइ अप्पमाणाइं ? (भट्टिनि, अलं विषादेन। तादृशानां महतां भाषितं यद् दर्शितसकललोकदिशामाहात्म्यं पुत्रं देवी जनयिष्यतीति। अथवा किमिमानि तव शोभनलक्षणानि अप्रमाणानि ?)

देवकी—हंजे, अणुभूअदे एव्व ताणं वि फलं। (हञ्जे ! अनुभूयते एव तादृगपि फलम्।)

निपुणिका—भट्टिणी, अलं णिव्वेदेण। दिट्ठिआ सव्वं कुसलोदक्कं भविस्सदि (सस्मरणम्) अज्ज विस्सवेद्दणित्ति दिव्वदेएणा कावि पडिघरं अडंदी मन्दं आअच्छंदी दिट्ठत्ति महरिआ भणिदं। जर

सा एत्थ आअच्छेदिति। (भट्टिनि, अलं निर्वेदेन। दिष्टया सर्वं कुशलोदर्कं भविष्यति। अद्य विश्ववेदिनीति दिव्यदेष्णा कापि प्रतिगृहमटन्ती मन्दमागच्छन्ती दृष्टेति मधुरिकया भणितम्। यदि सात्र आगच्छेदिति।)

देवकी—तदो किं ? (ततः किम् ?)

निपुणिका—तदो सव्वं विस्ससणिज्जं भवे। (ततः सर्वं विश्वसनीयं भवेत्।)

विश्ववेदिनी – अअं ओसरो अप्पणो पआसस्स (इत्यात्मानं प्रकाश्य) हंहो सुणह (अयमवसर आत्मनः प्रकाशस्य। हंहो शृणुत)

जंतूणं भालदेसे विहिपरिलिहिअं सव्वं एव्वाम्ह जाणे
वुत्तं जं देवलोए सरसिजभुअणे किं च पायाललोए।
दंसेदुं भइणीए विणिहिदमहिलं गब्भगब्भे णिहाणं
देवीए कालिआए .... ॥८॥

[जन्तूनां भालदेशे विधिपरिलिखितं सर्वमेवाहं जाने
वृत्तं यद्देवलोके सरसिजभुवने किञ्च पाताललोके।
दर्शयितुं भगिन्यै विनिहितमखिलं गर्भगर्भे निधानं
देव्याः कलिकायाः .... ॥८॥]

(देवकी निपुणिका च विश्ववेदिनीं दृष्ट्वा विस्मयमुपगच्छतः)

विश्ववेदिनी—(सस्मितम्) देवीए सोहणं देवीए सोहणं उत्तरूत्तराणुबंधं आअंदप्पदं। णमो अय्यं ते। (देव्याः शोभनं देव्याः शोभनमुत्तरोत्तरानुबन्धमानन्दप्रदम्। (साञ्जलि बन्धम्) नम आर्य्याय ते)

परमत्थं पवणिसा विअ ससंकलेसां जं·········हसं।
·········सक्खं गब्भे जा वहइ तं अहं वंदामि ॥६॥
(परमार्थं पर्वनिशा इव शशाङ्कलेश्यां य·········हंसम्।
·········साक्षाद् गर्भे या वहसि त्वमहं वन्दे ॥६॥)

देवकी—भद्दे, सागदं एत्थ उअविस (इत्यासनं दिशति) (भद्रे, स्वागतमत्रोपविश।

विश्ववेदिनी—अलं करोदु आसणं भोदी। (अलङ्करोतु आसनं भवती) (देवकी उपविशति)

विश्ववेदिनी—(उपविश्य, देवक्या मुख विलोक्य) किं मिलाअमाणं कमलं विअ देवीए वअणं ? (किं म्लायमानं कमलमिव देव्या वदनम् ?)

(देवकी विहस्य निपुणिकामुखमवलोकयति)

निपुणिका—अय्ये, तुए वि ण विदिअं किं णाम देवीए विसादस्स कालणं ? कदा वा समइस्सदि ? (आर्य्ये, तवापि न विदितं किं नाम देव्याः विषादस्य कारणम् ? कदा वा शमिष्यति।)

विश्ववेदिनी—अय्ये, भअवदीए कालिआए उवाअणं दिज्जइ।
(आर्य्ये, भगवत्यै कालिकायै उपायनं दीयताम्।)

(निपुणिका सकर्पूरपूगशकलानि ताम्बूलान्युपनयति।)

विश्ववेदिनी— (गृहीत्वा) णमो भअवदीए कालिआए (नमो भगवत्यै कालिकायै।)

(देवीं निर्वर्ण्य)

अंगम्मि अंगम्मि महाफलाइ
देवीए दीसंति सुलक्खणाइ।
[अङ्गे अङ्गे महाफलानि
देव्या दृश्यन्ते सुलक्षणानि।]

निपुणिका—अदो किं ? (अतः किम् ?)

विश्ववेदिनी—अदो सचीए अवि कंखणिज्जं
एसा अणुहोदुं पदं एत्थ जोग्गा॥१०॥
[अतः शच्या अपि कांक्षणीयं
एषानुभवितुं पदमत्र योग्या॥१०॥]

देवकी—एदाणं लक्खणाणं फलं इअं अवत्था ? (एतेषां लक्षणानां फलमियमवस्था ?)

विश्ववेदिनी—(पेटिकागर्भात्काञ्चनशलाकामादाय पुष्पाक्षता-दिभिरभ्यर्च्य साञ्जलिबन्धम्)

अज्जाए देवीए भअवदीए अक्खलिआए कालिआए ।
सच्चमईए सिध्धिसलाए सच्चं अत्थं दंसेहि मे अहिमदेदं ॥ ११ ॥
[आर्याया देव्या भगवत्या अस्खलितायाः कालिकायाः ।
सत्यमय्याः सिद्धिशलाके सत्यमर्थं दर्शय मेऽभिमतमिदम् ॥ ११ ॥]
इह कमलं इह कुलिसं इह कलसो एत्थ भाइधेअगदं ।
[इह कमलमिह कुलिशमिह कलशोऽत्र भागधेयगतम् ।]
(इति शलाकया निर्दिशति ।)

निपुणिका—तदो किं ? (ततः किम् ?)

विश्ववेदिनी—तासे सामन्तवहूसीमंताणं विभूसणं चलणं ॥ १२ ॥]
[तदस्याः सामन्तवधूसीमन्तानां विभूषणं चरणम् ॥ १२ ॥]
(पादं निर्वर्ण्य)

अहो से सोभाग्गं (अहो अस्याः सौभाग्यम् ।)

जावअरसाणुराओ मलिणीकरणं ति मम खु पडिहासो ।
णं अकति एदिस कुट्टिमरञ्जणा णइ ह उज्जलदि ॥ १३ ॥
[यावकरसानुरागः मलिनीकरणमिति मम खलु परिहासः ।
नूनमनन्तेदृशकुट्टिमरञ्जनाय उज्ज्वलति .... ॥ १३ ॥

निपुणिका—कि फलिदं एदेण ? (किं फलितमेतेन ?)

विश्ववेदिनी—एदेण सामंतादो देवीए विसादो त्ति ण आहणिअं।
(एतेन सामन्ततो देव्याः विषाद इति नाऽभणितम्।)
(पुनः शलाकां देवीहृदये निधाय सश्लाघम्।)

एक्कक्कपेमबंधणसमरसमेकक्क तुह अ दइअस्स ।
हिअअं अदिट्ठभेदं चिरविरहिणो विहाण अच्चेरं ॥१४॥
[एकैकप्रेमबन्धनसमरसमेकैकं तव च दयितस्य।
हृदयमदृष्टभेदं चिरविरहिणो विधानमाश्चर्यम् ॥१४॥

निपुणिका—अज्जाए साहु भणिदं (आर्यया साधु भणितम्।)
(सविषादस्मितम्) अदो खु सो अज्जउत्तो वि
विअहं वि दुक्ख अण'' च देवीए। (अतः खलु
स आर्यपुत्रोऽपि विभवमपि दुःख ''''च देव्यः।)

मअकलकलकंठी मंजुलारावरम्मा
अमिअ विअ सजंती अक्खरोत्ति उदारा।
ह्मिदपुरुवपवुत्तं कंठ आलावअंती
विवसअइ गिरा णो की सवत्तीण चित्तं ॥१५॥
[मदकलकलकण्ठी मञ्जुलारावरम्या
अमृतमिव सृजन्ती अक्षरोक्ती उदाराः।
स्मितपूर्वप्रवृत्तं कण्ठमालापयन्ती
विवशयति गिरा न किं सपत्नीनां चित्तम् ॥१५॥]

अदो देवीए पिअसहिभाव्वं भजंति सवत्तीओ। (अतः देव्याः प्रियसखिभावं भजन्ति सख्यः।)

देवकी—भद्दे, अदो क्खु एदाओवि मह किदे मिलाअंती। (भद्रे, अतः खलु एता अपि मम कृते म्लायन्ते।)

विश्ववेदिनी—णिउणिए, पेक्ख, देवीए। (निपुणिके, प्रेक्षस्व, देव्याः)

विअसिअकमलपलासच्छाआअदकंतिसोभग्गा ।
करुणासिनेहसीअलकडक्खिआ जअइ सिरिणिहा दिट्ठी॥१६।
[विकसितकमलपलाशच्छायात्मकान्तिसौभाग्या ।
करुणास्नेहशीतलकटाक्षिता जयति श्रीनिभा दृष्टिः ॥१६॥]

(देवकी अवचना तिष्ठति।)

विश्ववेदिनी—(आत्मगतम्) एदेण देवीए अपरितोसो विअ। तदो अभिप्पाअगदं अत्थं दंसेमि। (प्रकाशं, शलाकां वीक्ष्य) भद्दे, सिध्धिसलाकए अत्थं दंसेहि। (एतेन देव्याः अपरितोष इव। ततः अभिप्रायगतमर्थं दर्शयामि। भद्रे, सिद्धिशलाके ! अर्थं दर्शय।)

पाणिं प्पसारेहि पओहराओ लावण्णआरामणव्वप्पवालं ।
तिल्लोक्कसंजीवणसाहणांकं वामं णहाणीरुहसोपमाणं ॥१७॥
[पाणिं प्रसारय पयोधरयोर्लावण्यकारामनवप्रवालम् ।
त्रैलोक्यसञ्जीवनसाधनाङ्कं वामं सरसीरुहसोपमानम् ॥१७॥]

(देवकी अलसमन्थरं पाणिं प्रसारयति ।)

विश्ववेदिनी--(विलोक्य, सबहुमानम्)

चूदप्पवालसरसीरुहविद्दुमेसु कुंदसिरीसकुसुमेसु उमालभावो ।
देवीए हत्थकमलेक्खणे किं वि एदं, सक्कंतिरूअसउमाल-
गुणस्स रीइं ॥१८॥
[चूतप्रवालसरसीरुहविद्रुमेषु कुन्दशिरीषकुसुमेषु कुमारभावः ।
देव्या हस्तकमलेक्षणे किमप्येतत् सत्कान्तिरूपसुकुमारगुणस्य-
रीतिम् ॥१८॥]

निपुणिका - अय्ये, दिढं णिरूपेहि । (आर्ये, दृढं निरूपय ।)

विश्ववेदिनी--अय्ये, कुलदेवदे कालि, णमो दे । चिट्ठदु दाव लावण्णअं । वक्कुसउप्पत्तिं से णिरूवेमि ।
(आर्ये, कुलदेवते कालि नमस्ते । तिष्ठतु तावद् लावण्यकम् । अपत्यसमुत्पत्तिमस्या निरूपयामि ।)

देवकी--(जनान्तिकम्) हंजे, मह अभिप्पाअगदं किं एव्वं संदंसेइ ? (हञ्जे, ममाभिप्रायगतं किमेवं सन्दर्शयति ?)

निपुणिका——भट्टिणि, एसा क्खु विस्सवेइणी । (प्रकाशम्) अय्ये साहु णिरूपणिज्जं (भट्टिनि, एषा खलु विश्ववेदिनी । आर्ये, साधु निरूपणीयम् ।)

विश्ववेदिनी——इमाओ वक्करेआओ (इति क्रमेण रेखाषट्कं दर्शयित्वा, विमृश्य) इमा असमीईणा। (इति सविलक्षमपवार्य, दृष्टिं व्यावर्त्य) पडिहदममंगलं, पडिहदममंगलं, संतं पावं, संतं पावं । (पुनर्विमृश्य) विदिणा सव्वलोआहिमदं एव्व समाअरिदं अदिक्कंदेण वुत्तंतेण। (पुनः शलाकया सप्तमी-मपत्यरेखां चिरं परामृशति) (इमा अपत्यरेखाः। इमा असमीचीनाः । प्रतिहतममङ्गलम्, प्रतिहत-ममङ्गलम्। शान्तं पापम्, शान्तं पापम्। विधिना सर्वलोकाभिमतमेव समाचरितमतिक्रान्तेन वृत्तान्तेन ।)

निपुणिका——अय्ये किं अत्थं ? (आर्ये, कोऽर्थः ?)

विश्ववेदिनी——जाणिदं अंबाए अणुग्गहेण । (ज्ञातमम्बाया अनुग्रहेण ।)

निपुणिका——कहं विअ ? (कथमिव !)

विश्ववेदिनी——सग्गतमिव्व चंदं अपुण्णं एव्व देवीए गब्भादो णिक्कमिअ ट्ठाई जीवंतं चिट्ठई । (स्वर्गतमिव चन्द्रमपूर्णमेव देव्या गर्भतो निष्क्रम्य स्थायी जीवन् तिष्ठति ।)

देवकी—–णिउणिए, एदं वि णूणं इत्थि विअ पडिभाइ।
(एतदपि नूनं स्त्रीव प्रतिभाति ।)

विश्वभेदिनी—–(पुनरष्टमीं रेखां शलाकया निर्दिश्य सानन्दम्)
अहो देवीए भाअहेअं ।

विस्संभराभारहरो धुरीणः
विस्सातिओ विस्सविहाणदक्खो ।
आकप्पमव्वाहदपुण्णकंती
दिप्पाक्कजोइ अदु वासअस्स ॥ १६ ॥
(अहो देव्या भागधेयम् ।)

[विश्वम्भराभारहरो धुरीणः
विश्वातिगो विश्वविधानदक्षः ।
आकल्पमव्याहतपुण्यकान्ति—–
दीप्तार्कज्योतिरथ वत्सरस्य ॥१६॥]

जस्स पआवो दणुसुदहिअएसु जलइ मोलिसुं अहुणा ।
विलसदि दिसापईणं तिहुवण अहिलं वसे होइ ॥ २० ॥

सक्कं सरस्सईपइणो वि ण जस्स विहवं वण्णेदुं तारिसो तुवं कुमालो जणिस्सदि ।

[यस्य प्रभावो दनुसुतहृदयेषु ज्वलति मौलिषु अधुना ।
विलसति दिशापतीनां त्रिभुवनमखिलं वशे भविता ॥२०॥]

(शक्यं सरस्वतीपतेरपि न यस्य विभवं वर्णयितुं तादृशस्त्वां कुमारो जनिष्यते ।)

निपुणिका—अज्जाए पसादेण पच्चक्खं विअ कुमालं भावेमि । (आर्यायाः प्रसादेन प्रत्यक्षमिव कुमारं भावयामि ।

देवकी—(स्मितं कृत्वा) भद्दे, एदं मे पुत्तमुहसिसिरपुण्णणइजलसमुहस्स पिपासुणो मिअतिण्णासंतिकरावगाहणं पाणं अ प्पाणं च । (भद्दे, एतन्मे पुत्रमुखशिशिरपुण्यनदीजलसमूहस्य पिपासोर्मृगतृष्णाशान्तिकरावगाहनं पानञ्च प्राणं च)

विश्ववेदिनी—मा मा एव्वं । इदं खु परमत्थं । तुह गब्भे अदिक्कंदंतं सव्वं मिअतिण्हा त्ति ण भणिदव्वं । सुणादु देइ । देअासुलसिद्दगंधव्वजक्खरक्खसप्पमुहेहिं पूजिदाणं अपच्चाणं सिद्धी असिद्धी मए कहिआदो कदापि विसंवादं ण गच्छइ । सव्वं जहाप्पमाणं करिअदु मह भासिदं । (मा मैवम् । इदं खलु परमार्थं प्रस्तुतम् । तव गर्भे अतिक्रामत् सर्वं मृगतृष्णेति न भणितव्यम् । शृणोतु देवी । देवासुरसिद्धगन्धर्वयक्षराक्षसप्रमुखैः पूजितानामपत्यानां सिद्ध्यसिद्ध्यो मया कथिताः कदापि विसंवादं न गच्छन्ति । सर्वं यथाप्रमाणं करोतु मम भाषितम् ।)

देवकी—भद्दे, प्पमाणं करोमि जइ सो मह वच्चम्मिआ पावसीलो ण भवे। (भद्रे प्रमाणं करोमि यदि स मम अपत्येषु पापशीलो न भवेत्।)

विश्ववेदिनी—मा भआहि, वेसक्खिदादिअं सव्वं जो दुज्जणो, जस्स अत्तणो म्मिआ वसे अपो, देई देवइ इत्थि ति को णु तं, तस्स महापुरुसस्स तिलोअक्खमस्स को ओ कंसप्पमुहो असुरवग्गो ? (मा बिभेहि, शत्रुतादिकं सर्वं यो दुर्जनः, यस्यात्मनः देवी देवकी स्त्रीति को नु तं, तस्य महापुरुषस्य त्रैलोक्य। क्षमस्य कः कंसप्रमुखोऽसुरवर्गः ?)

देवकी—भद्दे, तुह भणिदं दाव वीहलाए मोरीए मेहमाला-गज्जिदं विअ आसासणमेत्तं मह होइ। (भद्रे, तव भणितं तावद् विह्वलाया मयूर्या मेघमालागर्जितमिव आश्वासनमात्रं मम भविष्यति।)

विश्ववेदिनी—देइ, सव्वहा अज्जाए कालिआए पसादलद्धं वअणं प्पमाणीकरीअदु। (विभाव्य सशिरःकम्पम्) एदस्स कंसहदअस्स अण्णाआअरणं देवीए विसादस्स कालणं। पसववेदणा अ इअं अणंतरे एव्व मुहुत्ते संभवइ। (देवि, सर्वथा आर्यायाः कालिकायाः प्रसादलब्धं वचनं प्रमाणीकरोतु।

एतस्य कंसहतकस्यान्यायाचरणं देव्या विषादस्य कारणम् । प्रसववेदना च इयमनन्तर एव मुहूर्त्ते सम्भविष्यति ।

देवकी—भद्दे, अहग्गणदसा पादसरणं अरूहदि । (भद्रे, अहर्गणदशा पादसरणमारोहति ।)

विश्ववेदिनी—(पुनर्देवीं निर्वर्ण्य) देवीए दोहलगुणाइ सिविणिअ । विलसिदं च कहेमि । (देव्या दोहदगुणान् स्वप्नविलसितं च कथयामि ।)

निपुणिका—कहं विअ ? (कथमिव ?)

विश्ववेदिनी—अअं देवीए संकप्पो (अयं देव्याः सङ्कल्पः)

बिंदावणम्मि पुण्णे सुगहंसाहिं भद्दाइ पुप्फाइ ।
लीलाए अ पडिअंती गोकुलमज्झम्मि वसेअ अहं ॥२१॥

[वृन्दावने पुण्ये शुकहंसैः भद्राणि पुष्पाणि ।
लीलया च पर्यटन्ती गोकुलमध्ये वसेयमहम् ॥२१॥]

रम्मा तणु सुमाला मंगलवलअं सहं तव""णवं
जा गोवद्धणसेलं धारेदुं महइ भुअलदा एसा ॥२२॥

[रम्या तनुसुमाला मङ्गलवलयं सहं तव""नवम्
या गोवर्द्धनशैलं धारयितुं महती भुजलता एषा ॥२२॥]

किञ्च

भुअगपइहोअकं विअ मणिमअसिंहासणम्मि आसीणा ।
........वाउलेहिं सिविणे जअमंगलेहिं हिंडुज्जए ॥२३॥

[भुजगपतिभोगकमिव मणिमयसिंहासन आसीना ।
......वातुलैः स्वप्ने जयमङ्गलैर्हिण्डामि ॥२३॥]

देइ, ण पारेइ सच्चं चदुराणणो वि तुह माहप्पं वण्णेदुं ।
(देवि, न पारयति सत्यं चतुराननोऽपि तव माहात्म्यं वर्णयितुम्)

(नेपथ्ये)

उवट्ठिदा खु देवदाराहणवेला देवईए । संपण्णाइ देवदाराहणोवकरणाइ । (उपस्थिता खलु देवताराधनवेला देवक्याः । सम्पन्नानि देवताराधनोपकरणानि ।)

(सर्वा आकर्णयन्ति)

निपुणिका—भट्टिणि, देवदाराहणत्थं सद्दावेदि कुलवुड्ढाओ ।
(भट्टिनि, देवताराधनार्थं शब्दापयन्ति कुलवृद्धाः ।)

देवकी—भद्दे, खणमत्तं उपविस । देवदाराहणं णिवत्तिअ आअच्छामि । णिउणिए, तुमं वि विस्सवेअणीए दुदीआ होहि । (इति गर्भभरालसा मन्दं मन्दं निष्क्रान्ता) (भद्रे, क्षणमात्रमुपविश । देवताराधनं निवर्तयित्वा आगच्छामि । निपुणिके, त्वमपि विश्ववेदिन्या द्वितीया भव ।)

निपुणिका—(समन्तादवलोक्य) अच्चलिअं अच्चलिअं (आश्चर्य-
माश्चर्यम् ।)

कप्पपाअवविअप्पतोरणं दिव्वअंसुअविदाणसोभिदं ।
पारिआअकुसुमोपहारअं दिप्पदिव्वमणिदीविआसअं ॥२४॥

[कल्पपादपविकल्पतोरणं दिव्यांशुकवितानशोभितम् ।
पारिजातकुसुमोपहारकं दीप्तदिव्यमणिदीपिकाशतम् ॥२४॥]

किञ्च

संगीअरसतरंगिअं अब्भुद आणंद उसव्वं महग्घं ।
पुण्णसुइघोसमुहलं वेउट्ठं विअ भाइ अम्ह घरं ॥२५॥

[सङ्गीतरसतरङ्गितमद्भुतानन्दोत्सवं महार्घम् ।
पुण्यश्रुतिघोषमुखरं वैकुण्ठमिव भात्यस्माकं गृहम् ॥२५॥]

विश्ववेदिनी—(विभाव्य) एसो क्खु ओअण्णस्स देवदेवस्स
हरिणो वेभवविलासो । (एष खलूत्पन्नस्य देवदेवस्य
हरेर्वैभवविलासः ।)

(उभे हर्षमभिनयतः)

(नेपथ्ये)

धन्यश्च जन्म युवयोः पितृत्वेन जगत्पितुः ।

विश्ववेदिनी—भअवदि, तुह पादवंदणप्पसादो एसो व सव्वं ।
(भगवति तव पादवन्दनप्रसाद एष एव सर्वम्)

(पुनर्नेपथ्ये)

भगवन्, भवदनुग्रहविशेष एष किं न सम्भाव्यते ?

(इति विश्ववेदिनी निपुणिका चोपसृत्य प्रणते भूत्वा)

निपुणिका—अहो अम्ह पुण्णपरिपाओ जं देअदेअं सव्वा पेक्खामो । अहो परिपुण्णमणोरहो लोओ । (साञ्जलिबन्धम्) देअदेअ णमो दे । (अहो अस्मत्पुण्यपरिपाको यद्देवदेवं सर्वाः प्रेक्षामः । अहो परिपूर्णमनोरथो लोकः । देवदेव नमस्ते ।)

विश्ववेदिनी—देई, वड्ढसि कुमालउब्भुअमहूसवेण (देवि, वर्धसे कुमारोद्भवमहोत्सवेन)

निपुणिका—(प्रणिपत्य) भट्टिणि, अणआ विस्सवेअणीए भासिदं क्खु होदि अभिमत्तत्थफलेण सच्चं । (भट्टिनि, अनया विश्ववेदिन्या भाषितं खलु भविष्यति अभिमतार्थफलेन सत्यम् ।)

देवकी—(सबहुमानम्) भद्दे विस्सवेइणि, तुह आसावणस्स पसादो एसो। (सप्रमोदं स्वाङ्गादाभरणान्युन्मुच्य) हंजे णिउणिए, विस्सवेइणीए एदेहिं भूसणेहिं भूसेहि। पट्टंसुअजुअलेन एदिणा परिधावेहि (भद्रे विश्ववेदिनि, तव आशावनस्य प्रसाद एषः। हञ्जे निपुणिके, विश्ववेदिनी-मेतैर्भूषणैर्भूषय। पट्टांशुकयुगलेनैतेन परिधापय।

(निपुणिका तथा करोति)

(सर्वे दिव्यमङ्गलवाद्यघोषं पुष्पवृष्टिं च दृष्ट्वा सानन्दं नृत्यन्ति।)

विश्ववेदिनी—(अञ्जलिं बद्ध्वा) देवई देई, किं वो भूएहिं पिअं उवहरेमि ? (देवकि, देवि, किं वो भूयः प्रियमुपहरामि ?

(नेपथ्ये)

जय जगत्पते देवकीनन्दन !

अद्य प्रसन्नं मम भागधेय—
मद्य प्रसन्ना ममता त्वदीया ।
अगम्यमक्ष्णां मनसां गिरां त्वां
यदद्य वीक्षे नयनैरमीभिः ॥२६॥

विश्ववेदिनी—(कर्णं दत्त्वा) अहो ओअएणं आदिपुरुसस्स अभिधाणं पिदामहेण किदं। (विलोक्य) एसा वसुदेवेण समं समग्गरयणगरुडसप्पपमुहा-दिसेविदा सपरिवाआ अंभोअसिंहासणं अधिचिट्ठइ देई। जा एसा

(अहो उपपन्नमादिपुरुषस्याभिधानं पितामहेन कृतम्। एषा वसुदेवेन समं समग्ररत्नगरुडसर्पप्रमुखा-दिसेविता सपरिवारा अम्भोजसिंहासनमधितिष्ठति देवी। यैषा)

मंगल्लण्हाणसुद्धा परिणदविमलक्खामअंके कुमालं
दिव्वं तं धारअंती विलसइ सइणो आकिदी लंछणं व।
वेदी जण्णप्पसूदा विअ हुदवहणं भासुरं भंखणं व
त्तेल्लोक्कग्घं मणींदुं दिणअरउदिअं पुण्णआसण्णपुप्फा ॥२७॥

[मङ्गल्यस्नानशुद्धा परिणतविमलक्षामाङ्के कुमारं
दिव्यं तं धारयन्ती विलसति शशिन आकृतिर्लाञ्छनं वा।
वेदी यज्ञप्रसूताइव हुतवहनं भासुरं भक्षणं वा
त्रैलोक्यार्घ्यं मणीन्द्रं दिनकरमुदितं पूर्णिमासन्नपुष्पा ॥२७॥]

(ततः प्रविशति यथोद्दिष्टा सपरिवारा देवी)

देवकी—जाद पिऊणो दंसणं देहि।
(जात पितुर्दर्शनं देहि ।)

(इति वसुदेवहस्ते कुमारमर्पयति)

वसुदेवः—(कुमारं हृदयेन धारयन्)

अङ्गमङ्गममृतोपमेन मे
स्पर्शनेन सुखयस्व पुत्रक !
अङ्गकैरमृतवृष्टिशीतलै—
रेधि तापहरणाभिलापुकैः ॥२८॥

पितामहः—भद्र वसुदेव, भद्रे देवकि !
वन्दनीयपदौ नित्यं युवां त्रैलोक्यवर्तिभिः ॥२९॥

देवकी—अअमेव परमो मोदो। (अयमेव परमो मोदः।)

पितामहः—भद्र वसुदेव, भद्रे देवकि, किं वो भूयः प्रियमुप·
करोमि ।

उभौ—भगवन्, किमतः परं प्रियम्, तथापीदमस्तु।

(भरतवाक्यम्)

राजा जीयान्नयविभवतः प्राणिरक्तः प्रवृत्तौ
विद्यावेदानुमतगतयः सन्तु यज्ञैरुपेताः ।
काले वृष्टिर्भवतु महती लोकमुज्जीवयन्ती
भक्तिर्भूयाद्भगवति मम श्रीपतौ वासुदेवे ॥३०॥

(निष्क्रान्ताः सर्वे)

(इति श्रीलोकनाथभट्टप्रणीतं कृष्णाभ्युदयं प्रेक्षणकं सम्पूर्णम् ॥)

हिन्दी अनुवाद

(नान्दी)

अन्वयः—या कापि स्तन्यरसं प्रदातुम् उचितां गोपाङ्गनाभूमिकां प्राप्ता, स्तनरसैः सह कृष्ण, त्वं तदसून् आपीतवान्। इह त्वाम् अन्या कथं विश्वसेत् इति व्याहारिणीं मातरं वीक्षन स्मेरमुखेन्दुः अङ्कशयितः मायाशिशुः नः पातु॥

वृत्त—शार्दूलविक्रीडित।

हिन्दी—तुझे दूध पिलाने के लिए जिस नारी ने गोपांगना की वेषभूषा धारण की, कृष्ण, तूने दुग्धपान के साथ उसके प्राण भी पीलिए। अन्य कौन नारी तुझ पर विश्वास करेगी? ऐसे कहती हुई माँ को देखते हुए शिशुरूप श्रीकृष्ण हमारी रक्षा करें। [१]

और भी

